24E
100 Marks

टिळक महाराष्ट्र विद्यापीठ, पुणे

संस्कृत पारंगत (एम.ए.) बहिःस्थ

परीक्षा: मे – २०२५

सत्र २ रे

विषय: साहित्य–२ (मुद्राराक्षस) (24E3208)

दिनांक: १९/०५/२०२५ **गुण : १००** **वेळ : स. १०.०० ते १.००**

सूचना: १) उजवीकडील अंक त्या प्रश्नांचे गुण दर्शवितात. २) सर्व प्रश्न सोडवणे अनिवार्य.

प्र. १. चतुर्णां श्लोकानां स्वभाषया अनुवादं कुरुत। (२४)

१. किं गच्छामि तपोवनं न तपसा शाम्येत्सवैरं मनः किं भर्तृननुयामि जीवति रिपौ स्त्रीणाभिर्य योग्यता ।
किं वा खड्गसखः पताम्यरिबले नैतच्च युक्तं भवेच्चेतश्चन्दनदासमोक्षरभस रुन्ध्यात्कृतघ्नं न चेत् ॥

२. प्रारभ्यते न खलु विघ्नभयेन नीचैः प्रारभ्य विघ्नविहता विरमन्ति मध्याः।
विघ्नैः पुनः पुनरैपि प्रतिहन्यमानाः प्रारब्धमुत्तमजना परित्यजन्ति ॥

३. पादस्याविर्भवन्तीमवनतिमवने रक्षतः स्वैरपातैःसंकोचेनैव दोष्णां मुहुरभिनयतः सर्वलोकातिगानाम् ।
दृष्टिं लक्ष्येषु नोग्रज्वलनकणमुचं बध्नतो दाहभीतेरित्याधारानुरोधात्त्रिपुरविजयिनः पातु वो दुःखनृत्तम् ॥

४. समुत्खाता नन्दा नव हृदयरोगा इव भुवः कृता मौर्य लक्ष्मीः सरसि नलिनीव स्थिरपदा ।
द्वयोः सारं तुल्यं द्वितयमभियुक्तेन मनसा फलं कोपप्रीत्योर्द्विषति च विभक्तं सुहृदि च ॥

५. पृथिव्यां किं दग्धाः प्रथितकुलजा भूमिपतयः पतिं पापे मौर्य यदसि कुलहीनं वृतवती ।
प्रकृत्या वा काशप्रभवकुसुमप्रान्तचपला पुरन्ध्रीणां प्रज्ञा पुरुषगुणविज्ञानविमुखी ॥

६. उच्छिन्नाश्रयकातरेव कुलटा गोत्रान्तरे श्रीर्गता तामेवानुगता गतानुगतिकास्त्यक्तानुरागाः प्रजाः ।
आप्तैरप्यनवाप्तपौरुषफलैः कार्यस्य धूरुज्झिता किं कुर्वन्त्वथवोत्तमाङ्गरहितैरङ्गैरिव स्थीयते ॥

प्र.२. पञ्च वाक्यानि ससन्दर्भं स्पष्टयत। (३०)

१. मौर्यस्यैव फलन्ति पश्य विविधश्रेयांसि मन्त्रीतयः ॥
२. प्रियहितद्वारेणाश्रयणीयमाश्रयेदिति ननु न्याय्य एवायमर्थः ।
३. स श्रीमद्बन्धुभृत्यश्चिरमरतु महीं पार्थिवश्चन्द्रगुप्तः ।
४. एकमपि नीतिबीजं बहुफलतामेति यस्य तव ।
५. अद्यापि बध्यमानां वध्यः को नेच्छति शिखां मे ।
६. क इदं दुष्करं कुर्यादिदानीं शिबिना विना ।

प्र. ३. द्वौ सविस्तरं लिखत। (३०)

१. विशाखादत्तस्य लेखनवैशिष्ट्यानि विवेचयत।
२. मुद्राराक्षसनाटकस्य कथानकं ऐतिहासिकमस्ति वा।
३. मुद्राराक्षसनाटके राजनीतिः कथं महत्त्वपूर्णमस्ति – विवेचयत।

प्र.४. अ) सन्धीन् विघटयत। (०६)

तामेकत्वमुपागताम् भुवनपतिरुच्चैरभिजनम् चेतश्चिरम्

आ) रूपपरिचयं लिखत। (१०)

नृपतेः त्यक्त्वा तस्य भक्त्या मया